ृ नं. | | | | | | | | |

मुद्रित पृष्ठों की संख्या : 6

28

**228 (HWG)**

# 2017

# संस्कृतम्

## (केवल प्रश्नपत्रम्)

धि : होरात्रयम् ] [ पूर्णांक : 100

र्देश : (i) अस्मिन् प्रश्नपत्रे चत्वारः खण्डाः सन्ति।
(ii) उत्तराणि पृथक् प्रदत्तायाम् उत्तरपुस्तिकायां लेखनीयानि।
(iii) प्रत्येकं खण्डम् अधिकृत्य उत्तराणि क्रमेण एकस्मिन् स्थाने लेखनीयानि।
(iv) प्रश्नपत्रे उत्तराणि न लेखनीयानि।
(v) प्रश्न संख्या प्रश्नपत्रानुसारम् अवश्यमेव लेखनीया।
(vi) खण्डसंख्या अपि लेखनीया।

### खण्ड – 'क' ( अपठितांश–अवबोधनम् )

अधोलिखितम् अनुच्छेदं पठित्वा अनुच्छेदाधारितान् प्रश्नान् उत्तरत–

उत्तराखण्डे समये–समये अनेके महापुरुषाः अभवन्। तेषु पं. गोविन्दवल्लभ पन्त महोदयः अग्रणीयः अस्ति। सः प्रख्यातः राजनीतिज्ञः, कुशलवक्ता, संसदीयप्रथायाः मर्मज्ञश्च आसीत्। सः 1887 तमे ख्रीष्टाब्दे सितम्बर मासस्य दशमे दिनाङ्के अल्मोड़ा जनपदस्य खूँट ग्रामे जन्म अलभत्। प्रारम्भिकी शिक्षा अल्मोड़ा नगरे प्राप्य सः उच्चशिक्षार्थं प्रयागनगरम् अगच्छत्। आंग्लशासकानाम् विरुद्धः सः 'कुमाऊँ परिषद्' संस्थायाः स्थापनाम् अकरोत्।

(क) एक पदेन उत्तरं लिखत– 1×2 = 2
 (i) उत्तराखण्डे समये–समये के अभवन् ?
 (ii) पन्त महाभागस्य प्रारम्भिकी शिक्षा कुत्र अभवत् ?

(ख) पूर्ण वाक्येन उत्तरत– 1
 (i) आंग्लशासकानां विरुद्धः सः कस्याः स्थापनाम् अकरोत् ?

(ग) निर्देशानुसारम् उत्तरत– 1×2 = 2
 (i) 'प्रख्यातः राजनीतिज्ञः' अत्र विशेषण पदं किम् ?
 (ii) 'सः उच्चशिक्षार्थम् प्रयागनगरम् अगच्छत्।' अत्र क्रियापदं किम् ?

अधोलिखितम् अनुच्छेदं पठित्वा अनुच्छेदाधारितान् प्रश्नान् उत्तरत–

महान् वैज्ञानिकः डॉ. जगदीश चन्द्र 'बसु' महाभागः विज्ञानक्षेत्रे प्रायः अभिनवप्रयोगं करोति स्म। 'बेतार' यन्त्रस्य आविष्कारः अनेनैव कृतः। यस्य श्रेयः 'मारकोनी' महाशयः अलभत्। विविध–प्रयोगान् कृत्वा तेन प्रदर्शितं यत् जीव जन्तूनिव वृक्षेष्वपि जीवनीशक्तिः वर्तते। एतेन प्रत्यक्षं प्रकटीकृतं यद् येन विषेण दर्दुरः म्रियते तेनैव विषेण वृक्षोऽपि म्रियते। यथा औषधि–विशेषेण मनुष्यः रोगमुक्तः भवति, तथैव वृक्षोऽपि रोगमुक्तः भवति। यथा मनुष्ये पाचनक्रिया भवति, तथैव वृक्षेष्वपि खाद्यरसानां परिपाकः पुष्टिश्च भवति। एवमेव स्वजीवनकाले विविधान् आविष्कारान् कृत्वा 'वसु' महाभागः वैदेशिकान् अपि आश्चर्यचकितम् अकरोत्। यद्यपि 'वसु' महाभागः अस्माकं मध्ये नास्ति किन्तु तस्य कार्याणि अद्यापि प्रेरणास्पदानि सन्ति।